# सुन्दरकाण्ड चतुश्चत्वारिंशः सर्गः (४४) - ॥ जम्बुमालिवधः ॥

सन्दिष्टो राक्षसेन्द्रेण प्रहस्तस्य सुतो बली ।
जम्बुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥

रक्त माल्याम्बरधरः स्रग्वी रुचिर कुण्डलः ।
महान् विवृत्त नयनश् चण्डः समर दुर्जयः ॥ २ ॥

धनुः शक्रधनुःप्रख्यं महद् रुचिर सायकम् ।
विस्फारयानो वेगेन वज्राशनि समस्वनम् ॥ ३ ॥

तस्य विस्फार घोषेण धनुषो महता दिशः ।
प्रदिशश्च नभश्चैव सहसा समपूर्यत ॥ ४ ॥

रथेन खरयुक्तेन तमागत मुदीक्ष्य सः ।
हनुमान् वेग सम्पन्नो जहर्ष च ननाद च ॥ ५ ॥

तं तोरण विटङ्कस्थं हनुमन्तं महाकपिम् ।
जम्बुमाली महाबाहुर् विव्याध निशितैः शरैः ॥ ६ ॥

अर्धचन्द्रेण वदने शिरस्येकेन कर्णिना ।
बाह्वोर् विव्याध नाराचैर् दशभिस्तं कपीश्वरम् ॥ ७ ॥

तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् ।
शरदीवाम्बुजं फुल्लं विद्धं भास्कर रश्मिना ॥ ८ ॥

तत्तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् ।
यथाकाशे महापद्मं सिक्तं चन्दन बिन्दुभिः ॥ ९ ॥

चुकोप बाणाभिहतो राक्षसस्य महाकपिः ।
ततः पार्श्वेऽतिविपुलां ददर्श महतीं शिलाम् ॥ १० ॥

तरसा तां समुत्पाट्य चिक्षेप बलवद् बली ।
तां शरैर् दशभिः क्रुद्धस् ताडयामास राक्षसः ॥ ११ ॥

विपन्नं कर्म तद् दृष्ट्वा हनुमांश् चण्डविक्रमः ।
सालं विपुल मुत्पाट्य भ्रामयामास वीर्यवान् ॥ १२ ॥

भ्रामयन्तं कपिं दृष्ट्वा साल वृक्षं महाबलम् ।
चिक्षेप सुबहून् बाणान् जम्बुमाली महाबलः ॥ १३ ॥

सालं चतुर्भिश् चिच्छेद वानरं पञ्चभिर् भुजे ।
शिरस् येकेन बाणेन दशभिस्तु स्तनान्तरे ॥ १४ ॥

स शरैः पूरित तनुः क्रोधेन महता वृतः ।
तमेव परिघं गृह्य भ्रामयामास वेगतः ॥ १५ ॥

अतिवेगोऽति वेगेन भ्रामयित्वा बलोत्कटः ।
परिघं पातयामास जम्बुमालेर् महोरसि ॥ १६ ॥

तस्य चैव शिरो नास्ति न बाहू न च जानुनी ।
न धनुर् न रथो नाश्वास् तत्रा दृश्यन्त नेषवः ॥ १७ ॥

स हतस् रसा तेन जम्बुमाली महाबलः ।
पपात निहतो भूमौ चूर्णिताङ्गविभूषणः ॥ १८ ॥

जम्बुमालिं च निहतं किंकरांश्च महाबलान् ।
चुक्रोध रावणः श्रुत्वा कोप संरक्त लोचनः ॥ १९ ॥

स रोष संवर्तित ताम्र लोचनः
प्रहस्त पुत्रे निहते महाबले ।

अमात्य पुत्रा नतिवीर्य विक्रमान्
समादि देशाशु निशाच रेश्वरः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥